णादिव्यवहारे मुख्यः न जातिमात्रादित्याह। यस्येति॥ ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णा
भिव्यंजकं। यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत्॥३५॥ यद्यदि अन्यत्र वर्णांतरेपि दृ
श्येत तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव विनिर्दिशेत् न तु जातिनिमित्तेनेत्यर्थः॥ ॥
इति श्रीभागवते महापुराणे सप्तमस्कंधे सदाचारनिर्णयो नामैकादशोऽध्यायः॥ ॥
॥ ॥ ॥ द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः। चतुर्णामाश्रमाणां च साधारणपतन्क

स्थिताः॥वर्णादीनांधर्मा उक्ताः॥इदानीमाश्रमधर्मा उच्यंते॥तत्रास्मिन्द्वादशोध्याये ब्रह्मचारि
वनस्थयोः॥असाधारणानुक्त्वोभयोःसाधारणो धर्मोच्यंते॥त्रयोदशे यतेर्धर्मः॥चतुर्दशे गृहस्थ
स्य॥पंचदशे सर्वधर्मसारसंग्रहः॥ब॥श्रीनारद उ॥ब्रह्मचारी गुरुकुले वसन्नकुर्वन्गु
रोर्हितं॥आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः॥१॥ब्रह्मचारी गुरुकुले वसन्गुर्वादीनु
पासीत तेन तेनाहूयः ताताद्वा॥ब॥सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान्॥संध्ये उभे
च यतवाग्जपन्ब्रह्म समाहितः॥२॥ब्रह्म गायत्रीं जपन् संध्याद्वयं उपासीत॥उभे संध्ये च यत
वाक्॥सायंप्रातः संध्याकालनिमित्तं मौनं कुर्यात्॥ब॥छंदांस्यधीयीत गुरोराहूतश्चेत्सु भ.टी. १३५

यंत्रितः॥उपक्रमेवसाने च चरणौ शिरसा नमेत्॥३॥उपक्रमे आदौ॥अवसाने अंते गुरोश्च
रणौ नमेत्॥ब॥मेखलाजिनवासांसि जटादंडकमंडलून्॥बिभृयादुपवीतं च दर्भपा
णिर्यथोदितं॥४॥यथोदितमिति॥पालाशो दंडो ब्राह्मणस्येत्यादि॥नियममनतिक्रम्य
जटाधारणं उ केशाद्यसाधनाभावमात्रं॥ब॥सायंप्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत्॥भुं
जीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित्॥५॥सुशीलो मितभुक् दक्षः श्रद्दधानो जितेंद्रियः
॥यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु वा॥६॥यावदर्थं भिक्षाग्रहणपर्यंतं॥ब॥वर्जयेत्प्र
मदागाथामगृहस्थो बृहद्व्रतः॥इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः॥७॥बृहद्व्रतः ब्र

स्म वर्यवान्।। गृहस्थव्यतिरिक्तः सर्वोपि वर्जयेत्।। तत्र हेतुः इंद्रियाणीति। इंद्रियाणि बलवं
ति यतेरपि मनो हरंतीति।।८।। केशप्रसाधनोन्मर्दनलेपनाभ्यंजनादिकं गुरुस्त्रीनिर्ग्रंथति
भिः कारयेन्नात्मनो युवा।।८ न कारयेदित्यत्र हेतुमाह। नद्यिति।।८।। नद्यग्निः प्रमदानामंत्र
तकं सेनेमः प्रमाणाम् तुलामपि रहो नह्यात् अन्यदा यावदर्थकृत्।। एरहः एकांते। अन्यदा
केशप्रसाधनादिव्यतिरिक्तावसरे यावदर्थं तदुक्तं कुर्यात्। ननु मिथ्यावादतिकरमलत्वा
त्वल्पकुधायः स्यात्। जह्यादिति कोयं निर्बंधः। तत्राह।।८।। कल्पयित्वात्मना यावद्राजामपि
दमीश्वरः। द्वैतं तावन्न विरमेत् नातात्मस्य विपर्ययः।।१० आत्मना स्वकृपसाद्दाकारेण इदं

=मति २
=प्रनेकांतावकरे ३

२ स्वयं

म.टी.
१३६

के

इदं इंद्रियादि न्नानासमाग्रं कल्पयित्वा निश्चित्य यावदसौ जीवः ईश्वरः स्वतंत्रो न भवेत्ता
वद्वैतं अयं प्रमान् इयं स्त्रीत्यादि। भेदो न विरमेत् तावद्वैतं। ततः किमतआह। ततः द्वैतादि
पर्ययः।।८।। एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि। गुरु स्त्री विकल्पेन गृहस्थस्य गुरुगा
मिनः।।११ गृहस्थस्य विशेषमाह। अंजनेति।।८।। अंजनाभ्यंजनोन्मर्दस्त्रावलेपमिषं मधु। स्रग्
गंधलेपालंकारान् त्यजेद्यद्यैष्टव्रतः।।१२ अंजनादीनामामिषांतानां द्वैतं।। अंजनं
शरीरस्याभ्यंजनं शिरसः।। स्त्रीयंच। अवलेखो चित्रकर्म स्त्रीणां कुर्यादो लेपनं अंजन
अंगादिस्वरूपतो निषिध्यते। पूर्वं तु कथं विदाय दिवान्नमपि। स्त्रीकर्तृकं निषिद्धमिति

गुरुस्त्रीनिमित

गुणाद्यासेन
योग्यतानुधिः
प्रतर्जयेदिदे
पक्षे
१२ सर्वं ... शा
२ पाधकतो ४

पाद

अ

अजा रतन्निरीक्ष
तोवार २

वेदः ॥छ॥ उ मुनिर्वैवंरूक्तेऊले द्विजोऽधीत्यावडुध्यव। त्रयीं सांगोपनिषदं यावदर्थं यथाबलं ॥
उक्तं गेः शिष्यादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य स्ववडुध्यवतदर्थं विचार्य यथा
वदर्थं स्वाधिकारानुसारेण ॥छ॥ दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः । गृहं वनं वा प्रवि
शेत् प्रव्रजेत्तत्र वा वसेत् ॥१४॥ यदीश्वरः शक्तस्तर्हि गुरोः काममपेक्षितं वरं दत्वा यथाधिका
रं गृहस्थाद्याश्रमं स्वीकुर्यात् । प्रव्रजेत वा । तत्रैव वा वसेत् । नैष्ठिकत्यादित्यर्थः ॥छ॥ अ
ग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं । भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥१५॥ पश्य ...सटी. १३१
धामभिः स्वाश्रयैः भूतैर्जीवैः सह ॥छ॥ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही । चरन्वि

गन्धयन्त्रपा

दितविज्ञानः परं ब्रह्माधिगच्छति ॥१६॥ तन्नियं स्तीयाचरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं
येन ॥ सः ॥छ॥ वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसंमतान् । यानातिष्ठन्मुनिर्गच्छेत् ऋषिलो
कमिहांजसा ॥१७॥ ऋषिलोकं महर्लोकं ॥छ॥ न कृष्टपच्यमश्नीयात् अकृष्टं चाप्यकालतः
। अग्निपक्वमथामं वा अर्कपक्वमथाहरेत् ॥१८॥ अकृष्टं अकृष्टपच्यं अश्नीयात् । अकाल
तः पाककालात्पूर्वमेव तिष्यन्नं नाश्नीयात् । अर्कपक्वं फलादि । अग्निपक्वं धान्यादि ।
आमं वा अश्नीयात् ॥छ॥ वन्यैश्चरुपुरोडाशान् निर्वपेत्कालचोदितान् । लब्ध्वा नवे नवेऽन्नाद्ये
पुराणं तु परित्यजेत् ॥१९॥ वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितान् नित्यानु

राणां पूर्वसंचितं यत्त्रादि परित्यजेत्॥१९॥ अन्यार्थमेव शरणमुटजं वा द्विकं दरं। आश्रयेत हिमा
वाद्युग्रैर्वर्षाद्यातिपमात्स्वयं॥२०॥ हिमादीन् स्वयं सहेत॥ केशरोमनखश्मश्रुमलान् नि
जटिलोदधत्। कमंडलुं जिनेंडे दैवं कुलाग्निपरिछदान्॥२१॥ केशादीन मलं वा पश्चालनेन
धारयेत्। स्नानं कुर्यात् द्वयपरं उपशालवस्त्रायात्। कमंडल्वादीश्च दधत्। धारयेदित्यर्थः॥
वरे घने वा दशाद्यानष्टौ वा चतुरो पुनः। विवेकं वा यथाबुद्धिर्न विपर्यंत कल्पवृतः॥२२॥ कल्प म.टी.
वृतः तपःक्लेशात् यथाबुद्धि न नाशयेत्। तथा वरेत्। द्वादशाद्यनंतरमपि स्वधर्मानुष्टाने १३८
शक्तः तर्हि वने एव वसेत्। यदि ज्ञानात्याप्तियोग्यः तर्हि सन्यसेत्। तत्र यरद्वितस्य यत्ना।

इति उत्तराध्याये

स्यं तदाह। यदेति॥ यदाकल्पः स्वदृष्टया यां व्याधिभिर्जरयो तवा। आन्वीक्षिकीं वा वि
द्यायां कुर्यादनशनादिकं॥२३॥ यदा स्वक्रियायां स्वधर्मानुष्टाने अकल्पः असमर्थः तदेव।
आन्वीक्षिकीं ज्ञानात्याप्ते। तदा अनशनं कुर्यात्। अनशनादिकं निष्पतः तत्स्वर्वं कल्पम
ह। आत्मनीत्यादिना यावदध्याय समाप्तिः॥ आत्मन्यग्नीन् समारोप्य संन्यस्य अहंम
मात्मतां। कारणेणुन्यसेत् सम्यक् संघातं तु यथार्हतः॥२४॥ यथार्हतः यथायोग्यं। स्वकार
णे आकाशादिषु संघातं देहं न्यसेत्। प्रविलापयेत्। तदेव विशदं दर्शयति खेखानीति
॥ खे खानि वायौ निश्वासान् तेजस्यूष्माणि आप्सु वा। अस्थ स्वक्लेष्मायानि क्षितौ॥

शेषं यथोक्तं ॥२५॥ खे आकाशे खानि देहगतछिद्राणि आत्मवान् धीमान् ॥३॥ घं अस्थिमां
सादिकठिनांशं क्षितौ ॥ एवं स्थूलशरीरस्य लयमुक्त्वा ॥ लिंगशरीरस्याध्यात्मादीनां स्वस्व
कारणेषु राजसाहंकारादिषु लयो वाच्यः ॥ तथापीह तेषां लयभावनाऽयं अद्वितीयात्म
प्रतिपत्तिपरेति ॥ यथा कथंचित्तेषु प्राप्ते देवतानां प्रवर्त्तकत्वेन प्राधान्यादिंद्रियतद्विषय
योर्देवतासु लयः कथ्यते ॥७॥ वाचमग्नौ सवक्तव्यां इंद्रे शिल्पं करावपि ॥ पदानि गत्या वय
सि रत्योपस्थं प्रजापतौ ॥२६॥ वक्तव्यसहितां वाचं अग्नौ न्यसेत् ॥ एवं सर्वत्र पादौ गत्या सह वय
सि विष्णौ ॥७॥ रत्योपायुं विसर्गं च यथास्थानं विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्शमध्या

भटी॰
१३९

अध्यात्मविदिति पाठे वायाविति ज्ञातव्यं ।

त्मनि वायौ ॥२७॥ सनादेन शब्देन सह अध्यात्मनि वायौ ॥७॥ रूपाणि चक्षुषा राजन् ज्योति
ष्यभिनिवेशयेत् ॥ अप्सु प्रचेतसा जिह्वां गंधैर्घ्राणं क्षितौ न्यसेत् ॥२८॥ ज्योतिषि आदित्ये रू
पाणि ॥ रसगंधयोस्त्विंद्रियाद्याकर्षत्वेन प्राधान्यविवक्षया देवतासहितस्य इंद्रियस्य
विषये लयमाह ॥ प्रचेतसा सह जिह्वां रसनां अप्सु रसरूपासु ॥ घ्राणशब्देन अश्विनोरप्यु
पलक्षणं ॥ अश्विभ्यां सह घ्राणं घ्रेयैः गंधैरुपलक्षितायां क्षितौ विन्यसेदित्यर्थः ॥७॥ मनो मनोर
थैश्चंद्रे बुद्धिं बोध्यैः परे ॥ कर्माण्यध्यात्मना रुद्रे यदहंममता क्रियया ॥२९॥ परेकावाब्रह्म
णि ॥ अध्यात्मना अहंकारेण ॥ कथं तत्तद्रुद्रे यद्यस्मात्तु अहंममतापूर्विका क्रिया भवति

द्विं बो २

अध्यात्मना इति पाठे कर्माण्यहंकारेण सहेत्यर्थः

तस्मिन्॥[illegible]॥ सत्त्वेन चित्तं क्षेत्रज्ञे ज्ञेयगुणैर्वैकारिकं परे। अस्त्विति तिमा। योऽज्योतिष्पदो वा।
युतेन मे स्यन्तं॥३०॥ सत्त्वेन चेतनया गुणैर्गुणकार्यैः आगवपिष्टैर्दैवैः सह। यद्वा सत्त्वादि
भिर्गुणैर्हेतुभूतैः वैकारिकं मोक्षत्वादिविकारवंतं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ति।
ननु विकारवतः कथं परे अविकारे लयः स्यात्तत्राह। विकारहेतूनां सर्वोपाधीनां लय
वारेणेत्यर्थः। अस्त्विति अदोऽप्याति॥[illegible]॥ कूटस्थे तच्च महति तदव्यक्ते तारे च ततः। इत्य सटी·
क्षरे तयात्मानं चिन्मात्रमवशेषितं ज्ञात्वाऽद्वयो ध्यायिरमेत दग्धयोनिरिवानलः॥३१॥ त १४०
वतत्पक्षस्ते अहंतत्त्वे। तच्च महति महत्तत्त्वे। तदव्यक्ते प्रधाने। तत् अव्यक्तं प्रधानं अक्षरे

परमात्मनि। इति सर्वोपाधिलयाद्धेतोः अवशेषितं चिन्मात्रमात्मानं ज्ञात्वाऽहमस्मीत्यनयाज्ञ
वाद्वयः सन् विरमेत्। दग्धकाष्ठो यथानलः॥[illegible]॥ ॥इति श्रीभागवते महापुराणे सप्त
मस्कंधे आश्रमधर्मकथने द्वादशोऽध्यायः॥ ॥[illegible]॥ ॥त्रयोदशे यतेर्धर्मः साधकस्योच्य
ते महान्। अवधूतेतिहासेन सिद्धावस्थाऽववर्ण्यते॥ श्रीनारद उवाच॥ कल्पस्त्वेवं परिव्र
ज्य देहमात्रावशेषितः। ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं॥१॥ एवं ध्या वाऽकल्प
स्तु ध्यानेन शान्तं कुर्यात्। आन्वीक्षिक्यां कल्पश्चेत् द्विपरिव्रजेदिति संबंधः। कियदवत्याज्य
देहव्यतिरिक्तं सर्वमित्याह। देहमात्रेति। तस्य धर्मानाह। ग्रामैकरात्रेण वसितः॥[illegible]॥ बिभृ

ॐ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये। आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये॥ ४
ॐ सदसतः परे कार्यकारणव्यतिरिक्ते ॐ

याद्यद्येसो वासः कोपीनाछादनं परं। त्यक्तं न लिंगदंडादेरन्यत्किंचिदनापदि।१२ कोपीनं
गुह्यं आछाद्यते यावता तावन्मात्रं परं केवलं अन्यदपि वा त्यक्तं प्रैषोच्चारणात्पूर्वमेवा
एक एव चरेद्भिक्षुः आत्मारामोऽनपाश्रयः। सर्वभूतसुहृच्छांतो नारायणपरायणः।१३ नवा
त्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः न हि बद्धमुक्तयोरैक्यं संभवति। तत्राह सु
प्तेति॥ बा॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् पश्येद्बंधं च मोक्षं च मायामात्रं न
वस्तुतः॥ १४ सुषुप्ते हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते। संधौ तु
तमो नापि विक्षेपः। अतस्तदा आत्मदृक् आत्मानं लक्षीकृत्य स्थितः सन् आत्मनो गतिं तत्त्वं

किंचित्ज्ञानं किंचिदज्ञानं २

सटी. १४१

पश्यन् तु अत एव बंधं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः। त
दुक्तं योगग्रंथे। निद्रादौ जागरस्यांते यो भाव उपजायते। तं भावं भावयन्नित्यं मुच्यते को
न बंधनात्॥ बा॥ नाभिनंदेत ध्रुवं मृत्युमध्रुवं वास्य जीवितं। कालं परं प्रतीक्षेत भूतानां
प्रभवाप्ययौ॥ १५ अस्य देहस्य प्रभवोऽप्ययश्च यस्मात् तं कालं॥ बा॥ नासच्छास्त्रेषु सज्जे
त नोपजीवेत जीविकां। वादवादांस्त्यजेत्तर्कान्पक्षं कंचन संश्रयेत्॥ १६ असच्छास्त्रेषु अ
नात्मपरेषु। नाटकादिषु। जीविकां नक्षत्रविद्यादिरूपां। वादवादान् जल्पवितंडानिष्ठान्
कं च न मपि पक्षं निर्बंधेन न संश्रयेत्॥ बा॥ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून्

वाउने तेतोयदि
पु-प्रकृतिविधावृ

व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित्।८। शिष्यान्नानुबध्नीत। प्रलोभनादिबलान्नापा
दयेत्। आरंभान्मठादिव्यापारान्नकुर्यात्। पारमहंस्यविशेषमाह।९। नयतेराश्रमप्र
यो धर्महेतुर्महात्मनः। शांतस्य समचित्तस्य बिभृयादुतवा त्यजेत्।९। नयतेराश्रमो धर्म
ःकथंभूतस्य यतेः महात्मनः परमहंसस्य। तस्य लक्षणं शांतस्येत्यादि। प्राय इत्यस्या
यं भावः। ज्ञानोत्पत्तिपर्यंतं बहूदकादिलिंगमाश्रित्य अवश्यस्वधर्मयमान्नियमांश्चा
चरेत्। ज्ञानोत्पत्तौ यतेत। उत्पन्ने तु ज्ञाने न यमाद्यैः कृत्यमस्ति। यमाश्च स्वत एव स्फुरंति। अतो भटी· १४२
ल्लादंडलिंगादिभिः प्रयोजनाभावात् लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति। तामेव ज्ञानद

र्शाभावे योगे त्वत्रापरिहारार्थमाह। अव्यक्तेति।१०। अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्त
बालवत्। कविर्मूकवदात्मानं स्वं दृष्ट्या दर्शयेन्नृणां।१०। नवद्विर्व्यक्तं लिंगं यस्य। व्यक्तोऽर्थ
ःप्रयोजनं आत्मानुसंधानं यस्य सः। मनीष्यपि उन्मत्तबालवच्चरेत्। कविरपि मूकवदा
त्मानं नृणां दृष्ट्या दर्शयेत्। ते यथोन्मत्तादिरूपं विदेरन् तथा वर्तेत। स्वदृष्ट्येति पाठे बाह्या
नुसंधानाभावेनेत्यर्थः। परमहंसधर्ममितिहासेन स्फुटयति अत्रापीति द्वाभ्यां यावदध्यायस
माप्तेः।११। अत्राप्युदाहरंतीममितिहासं पुरातनं। प्रह्लादस्य च संवादं मुनेराजगरस्य च
।११। अजगरव्रतस्य मुनेः अजगरव्रतं नाम एकत्र स्थित्वा प्रारब्धकर्मभोगः।१२। तं शयानं

वे१

रोपस्थे कावेर्यां सह्यसानुनि । रजस्वलैस्तनूदेशे निगूढामलतेजसं ।।१२ धरोपस्थे भूतले । सह्य
देशस्तटे । रजोभिः धूसरैस्तनूदेशैर्देहावयवैः । निगूढं च्छन्नं मलं तेजो यस्य तं ।।टी।। ददर्श लोकान्वि
चरन् लोकतत्त्वविवित्सया । वृतोमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ।।१३ कर्मणाकृतिभि
र्वाचा लिंगैर्वर्णाश्रमादिभिः । न विदंति जना यं वै सोसाविति न वेति च ।।१४ कर्मादिभिर्जना
यं न विदुः ।।टी।। तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् । विवित्सुरिदमप्राक्षीन्म
हाभागवतोसुरः ।।१५ तं पादयोः शिरसा स्पृशन् नत्वा अप्राक्षीत् । इत्युत्तरेणान्वयः ।।टी।।
बिभर्षि कायं पीवानं सोद्यमो भोगवान् यथा । वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ।।१६ भटी। १४२

उद्यमवानिव भोगवानिव पीवानं स्थूलं देहं धारयसि । तत्र हेतुं वदति वित्तमीयेनाद्युद्यमः ।
उद्यमं विनैव मम भोगोस्तीति चेत्तत्राह । वित्तं चेति ।।टी।। भोगिनां खलु देहोयं पीवा भवति ना
न्यथा । न ते शयानस्य निरुद्यमस्य ब्रह्मन्नुहार्थो यत एव भोगाः । अभोगिनोयं तव विप्र देहः
पीवा यतस्तद्वद नः क्षमं चेत् ।।१७ नु इति निश्चये । हे इति अपि हे ब्रह्मन् तवार्थो नास्ति । निद्यमिद्ध
मित्यर्थः । यतोर्थाद्भवति तदेतोः पीवा त्वमं यो स्पंचेत् । किंच । वित्तार्जनाद्यमर्थोप्यर्थ
जनः तदर्थमुद्यमं करोति त्वं तु समर्थोपि किमित्युद्यमं न करोषीत्याह ।।टी।। कविः कल्पो
निपुणदृक् चित्रप्रियकथः समः । लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ।।१८ कविर्वि

धान्‌कल्पोदक्षः निपुणदृक्‌चतुरः। चित्राः प्रियाः लोकरंजना कथा यस्य। तथापि लोकस्य
कर्म कुर्वतस्ततः शेषे। तद्वीक्षिता। पि सर्वं पश्यन्नपि न द्वेषि। तो विद्वानज्ञोषीत्यर्थः॥१॥ तद्दर
श्रीनारद उवाच॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः। स्मयमानस्तमभ्याह तद्वाग्गृहीत
यंत्रितः॥१९ तस्य वागेव सूत्रं तेन यंत्रितो वशीकृतः सन्नाह॥१॥ अवधूत उवाच॥ वेदे
दमसुरश्रेष्ठ भवान्नन्वार्यसंमतः। ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा॥२० अध्यात्मच भटी·
क्षुषान्तर्दृष्ट्या। भवान्वेद वेत्ति। आर्याणां ज्ञानिनां संमतो भवति॥ इदं किमिति यदुक्तं तदेवाह। १४४
नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्यर्थः वेदेत्यत्र हेतुर्यस्येति॥१॥

यस्य नारायणो देवो भगवान्हृद्गतः सदा। भक्त्या केवलयाज्ञानं धुनोति ध्वांतमर्कवत्॥२१
हृदि प्रविष्टः सन्नज्ञानं धुनोति नाशयति। अर्कोदितो यथा ध्वांतं॥१॥ अथापि ब्रूमहे प्रश्नां
स्तव राजन्यथाश्रुतं। संभाषणीयो हि भवानात्मनः शुद्धिमिछता॥२२ यथाश्रुतमिति
अनृतपरिहारायोक्तं। लोकः कर्मसु प्रवर्तते निवर्तते च। त्वं तु निवृत्तः सन्कुतः किं शेष इति यत्पृष्टं तस्यो
त्तरमाह द्वाभ्यां तृष्णयेति च त्रिभिः॥१॥ तृष्णया भववाहिन्या योग्यैः कामैरपूर्यया। कर्माणि कार्य
माणोहं नानायोनिषु योजितः॥२३ भवप्रवाहकारिण्या तृष्णया। यथोचितैरपि विषयैः
पूरयितुमशक्यया कर्मसु प्रवर्त्यमानोहं पूर्वं नानायोनिषु प्रवेशितः॥१॥ यदृच्छया लोका

मिमं प्रापितः कर्मभिर्भ्रमन् । स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥२४॥ तद्येव दत्तमेवेदं
लोकं मनुष्यदेहं धर्मेण स्वर्गस्य द्वारं साधनं । अधर्मेण तिरश्चां श्वानशूकरादियोनेः कारणं
। मिश्राभ्यां पुण्यापुण्याभ्यां पुनरप्यस्य मनुष्यत्वस्य द्वारं । सर्वतो निवृत्त्या त्वपवर्गस्य द्वार
मित्यर्थः ॥ ७ ॥ अत्रापि दंपतीनां च सुखायान्यापनुत्तये कर्माणि कुर्वतां दृष्ट्वा निवृत्तोस्मि
विपर्ययं ॥२५॥ अत्रापि मनुष्यत्वेप्यन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोस्मीन
नु प्रवृत्त्या कदाचित्सुखं स्यात् । निवृत्त्या तु किं स्यात्तत्राह ॥ ७ ॥ सुखमस्यात्मनो रूपं सर्वेहोपर
तिस्तनुः । मनःसंस्पर्शजान्दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥२६॥ सुखमस्य स्वरूपमेव । तत

सुखाय सुखप्राप्त्यर्थं ।३ जीवस्य ।२

भ.टी.
१४५

ईहा किं न प्रकाश्यते । तत्राह ॥ सर्वेति ॥ तनोतीति तनुः सर्वक्रियानिवृत्तौ अत एव प्रकाशतनुरि
त्यर्थः । भोगांश्च मनःसंस्पर्शजान्मनोरथमात्रजानशाश्वतान्दृष्ट्वा स्वप्स्यामि निरु
द्यमोस्मीत्यर्थः । तर्हि कदाचित्कथं दुःखं तत्राह ॥ संविशन्प्रारब्धकर्मफलभोगी ॥ ७ ॥ इ
त्येतदात्मनि स्वार्थं । संतं विस्मृत्य वै पुमान् । विचित्रामसति द्वैते घोरामाप्नोति संसृतिं ॥२७॥
इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वप्रियेनैवमंतं पुरुषार्थं विस्मृत्य अत्र असत्यपि द्वैते ए
तदेव दृष्टांतेन स्पष्टयति ॥ जलमिति ॥ ७ ॥ जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्यया । मृग
तृष्णामुपाधावेत्तथान्यत्रार्थदृक्स्वतः ॥२८॥ तदुद्भवैः तृणशैवालादिभिः । जलकाम ।

घोरां संसृतिं
प्राप्नोति २

याजलेछया।स्वतःआत्मस्वरूपादन्यत्रउक्तषार्थेपरुपन्नएवंसुखस्पतिरूपयमेवकारणमुक्त
विपर्ययंदृष्टेतियडक्तंनद्विष्टणोति।देहादिरितिपंचभिः॥७॥देहादिभिर्दैवतंत्रैःआत्मनः
सुखमीहतःडःखात्ययंचानीशास्यचेष्टयामोघाःस्ततास्रुताः॥२८॥ईहतःइच्छतश्चैनी।
शाष्ठानिर्दैवस्यस्वतःप्रतःप्रारब्धाःक्रियाःमोघानिष्फलाएवभवति।क्रियाणांसफलत्वेपिफ
लस्यानुपयोगमाह॥७॥आध्यात्मिकादिभिःडःखैरविमुक्तस्यकर्हिचित्।मर्त्यस्यकृच्छ्रोप
नतैरर्थैःकामैःक्रियेतकिं॥२९॥मर्त्यस्यमरिष्यतःकृच्छ्रेणडःखेनोपपन्नैःप्राप्तैःकृच्छ्रंविनै मटी. १५६
वप्राप्तेष्वर्थेषुडःखंपश्यामीत्याह॥७॥पश्यामिधनिनांक्लेशंलुब्धानामजितात्मनां।भ

तदेवस्वं१

यादलब्धनिद्राणांसर्वतोभिविशंकिनां॥३१॥भयंप्रपंचयतिराजतइति॥७॥राजतश्चौरतेरेःम
शत्रोःस्वजनात्पशुपक्षितः।अर्थिभ्यःकालतःस्वस्मात्नित्यंप्राणार्थवद्भयं॥३२॥स्मोस्वेतम स्वात्पवर
नःकथंचित्त्यागभोगविस्मरणादिनानाशःस्यादिति॥प्राणवतांअर्थवतोंपभयंनित्यं
अतोऽन्तर्यद्देतुवाह्प्राणेजीवनेत्वर्थेवस्पृहानकार्या।इत्याह॥७॥शोकमोहभयक्रो
धरागक्लैव्यश्रमादयः।यन्मूलाःस्युर्तृष्णाजह्यात्स्पृहांप्राणार्थयोर्बुधः॥३३॥ननुएवंअन
र्थानन्तत्वं(?)तोपिनकेपिबिभिरुद्यंते।नवयथालाभेनतुष्यंति।तंतुकथंवैराग्यादिकंप्राप्नो
मितद्वाह।मधुकारेति॥७॥मधुकारमहासर्पौलोकेस्मिन्नोगुरूत्तमौ।वैराग्यंपरितोषंच

ज्ञानाय शिष्याववयो ॥३४॥ मधुमक्षिकाजगरौ । ययोः शिष्याहन्नपर्यालोचनया वैराग्यं ।
परितोषं च प्राप्ता वयं ॥३॥ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् । कृच्छ्राप्तं मधुवत् ।
वित्तं हत्वाप्यन्यो हरेत्पतिं ॥३५॥ वित्तपतिं हत्वान्यो वित्तं हरेदिति मधुमक्षिकादृष्टांतेन ।
शिक्षितं ॥ अजगराच्छिक्षितमाह । अनीह इति ॥३॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहं ।
नोचेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥३६॥ सत्त्ववान् धैर्यवान् पीनचेष्टेंगवदन् यदृच्छया ।
प्राप्तात्परितोषं प्रापयति । क्वचिदिति षड्भिः ॥३॥ क्वचिदल्पं क्वचिद्भूरि भुंजेन्नं स्वाद्वस्वादु वा । क्व   मदी. १५७
चिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥३७॥ श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितं ।

भुंजे भुक्त्वाथ कस्मिंश्चित् दिवा नक्तं यदृच्छया ॥३८॥ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा । व
से न्यदपि संप्राप्तं दिष्टभुक् तुष्टधीरहं ॥३९॥ चीरं जीर्णवस्त्रखंडं । वसे परिदधे दिष्टभुक् ।
प्रारब्धकर्मफलभोगी ॥३॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु । क्वचित्प्रासादपर्यंके
कशिपौ वा परेच्छया ॥४०॥ प्रासादमध्ये पर्यंके तत्रापि कशिपौ तूलिकायां ॥३॥ क्वचित्स्ना
तोनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः । रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ॥४१॥ चरे
विचरामि । क्वचिद्दिगंबरो विचरामि न च मानापमानकर्तृत्वं मम वैषम्यमित्याह । नाहमि
ति ॥३॥ नाहं निंदे न च स्तौमि स्वभावविषमं जनं । एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि

।४२नाहं निंदामि न च स्तौमि। महात्मनि विष्णौ। एवं तत्त्वविदा स्थितो भूपायमाह। विकल्पमि
ति।४३।विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे। मनो वैकारिके हुत्वा तं मायायां जुहो
त्यनु।४३चित्तौ भेदस्याद्दृक्मनो दृष्टौ। तां चित्तवृत्तिं अर्थरूपो विभ्रमो यस्मिन् मनसि त
न्मनो वैकारिके अहंकारे। ततः अहंकारं अनु अनंतरं मायायां आत्मानुभूतौ तां मायां
जुहुयात् सत्यदृक्मुनिः। ततो निरीहो विरमेत् स्वानुभूत्यात्मनि स्थितः।४४सत्यमेव पश्य
तीति तथा।४।स्वात्मवृत्तं मयेत्थं ते सुगोप्यमपि वर्णितं। व्यपेतं लोकशास्त्राभ्यां भवान् हि
गवत्परः।४५मंददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या। यतो भवान् भगवत्परः।

पर।१

।४५मंददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या। यतो भवान् भगवत्परः।४।श्रीना
रद उवाच॥ धर्मं पारमहंस्यं वै श्रुत्वासुरेश्वरः। पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ
गृहं।४६॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे आश्रमधर्मवर्णनो नाम त्रयो
दशोऽध्यायः॥ ॥१३॥ ॥चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते। देशकालादिभेदेन उत्त
रश्रेयो विशेषरूपतः॥ गृहस्थस्य मुख्यं मोक्षमेतं अंगत्वेन प्रथमं वनस्थयतिधर्मेषु विहितेषु
तद्धि किं गृहस्थस्य मोक्षो न स्यात् इति शंकितचित्तः पृच्छति।१।युधिष्ठिर उवाच॥ गृह
स्थ एतां पदवीं विधिना येन चांजसा। यायाद्देवऋषे ब्रूहि मादृशो गृहमूढधीः।१।स्तस्य मे

साधु पृष्टं महाभाग लोकान् मम कुरु हृता। तचैनेन दर्शितं नैकर्म्यं येन कर्म सिद्धि।

क्तधर्मानास्थाय गृहे स्थितिर्यावदध्यायसमाप्तिः ॥१॥ श्रीनारद उवाच ॥ गृहेष्ववस्थितो राजन् ॥
क्रियाः कुर्वन्यथोचिताः । वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥२॥ साक्षाद्वासुदे
वार्पणं यथा भवति तथा क्रियाः कुर्वन् । गृहोचिताः । महत्सु कृपालूनुपासीत ॥२॥ शृण्वन्भ
गवतोऽभीक्ष्णमवतारकथामृतं । श्रद्दधानो यथाकालमुपशान्तजनावृतः ॥३॥ सत्संगाच्छ
नकैः संगमात्मजायात्मजादिषु । विमुञ्चेन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥४॥ स्वयमेव मु
च्यमानेषु विमुच्यमानेषु । यथा स्वप्नादुत्थितः पुमान् । स्वप्नदृष्टेषु सुतादिषु संगं विमुंचति ।
तद्वत् । नचैवंभूतस्य कुटुंबजनैः परित्यज्यमानस्य कुतो गृहोचिताः क्रियाः स्युरत आह । या

वदर्थमिति ॥५॥ यावदर्थमुपासीनो देहे गेहे च पंडितः । विरक्तो रक्तवत्तत्र नृलोके नरतां न्य
सेत् ॥५॥ तत्र त्वनासक्तः बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत्प्रकाश
कारं तावित्कुर्यादित्यर्थः । आग्रहं तु क्वापि न कुर्यादित्याह । ज्ञातय इति ॥६॥ ज्ञातयः
पितरौ पुत्रा भ्रातरः सुहृदोऽपरे । यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥६॥ एवं सर्वानु
मोदने वित्तस्य व्ययप्रसंगात् कुतो जीवनं कुतो वा कर्मकरणं तत्राह । दिव्यमिति ॥७॥ दिव्यं ।
भौमं चान्तरिक्षं वित्तमच्युतनिर्मितं । तत्सर्वमुपयुञ्जान एतत्कुर्यात्स्वतो बुधः ॥७॥ दिव्यं वृष्ट्या
दिना जातं धान्यादि । भौमं निधानादि । आन्तरिक्षं अकस्मादेव प्राप्तं । अच्युतनिर्मितं यो

सोविश्वंभरोदेवःकथंभक्तानुपेक्षतइति।एतत्सर्वोक्तिंकर्मादिदैवाद्युक्तिमेनातपि
तात्राभिमानेनकार्यइत्याह।यावदिति।ठ।यावद्भ्रियेतजठरंतावत्स्वत्वंहिदेहिनां।अधि
कंयोभिमन्येतसस्तेनोदंडमर्हति।ठ।मृगेतिसार्धेन।ठ।मृगोष्ट्रखरमर्काखुसरीसृपखग
मक्षिकाः।आत्मनःपुत्रवत्पश्येत्तैरेषामंतरंकियत्।अतएवयंकमपिस्वगृहक्षेत्रेवा
प्रविश्यभुंजानंवाननिवारयेत्।मर्कोमर्कटः।सरीसृपःसर्पः।मक्षिकावा।तैःपुत्रैःएषां
मृगादीनांकियदंतरं।ठ।त्रिवर्गंनातिकृच्छ्रेणभजेतगृहमेध्यपि।यथादेशंयथाकालं
यावद्दैवोपपादितं।१०।अतिकृच्छ्रेणायासेनत्रिवर्गंनभजेत्।किंतुयावद्दैवोपपादितं।ताव

त्भजेत्।ठ।आश्वाघांतेवसायिभ्यःकामान्संविभजेद्यथा।अप्येकामात्मनोदा
रांनृणांस्वत्वग्रहोयतः।११।आश्वान्श्वघाश्चपतिताः।अंतेवसायिनश्चांडालादयःतान्
भिव्याप्ययथार्हंकामान्विभजेत्।स्वभोज्यादिभज्यदद्यात्।यद्यप्येकैवात्मनोदा
राभार्यातस्यांअतिथिशुश्रूषणेनियुक्तायांस्वस्यशुश्रूषादीयेत।यस्यांचग्रहणं।स्वत्व
ग्रहः।ममैवेयमित्याग्रहः।तामेकामपिसंविभजेत्।अतिथिशुश्रूषणेनियुंजीतेत्यर्थ
ःनत्वन्यथा।मंतव्यंयथार्हंविभजेदित्युक्तत्वात्।एवंवर्त्तनेनईश्वरोवशीकृतःस्यादित्या
ह।ठ।जह्याद्यदर्थेस्वप्राणान्हन्याद्वापितरंगुरुं।तस्यांस्वत्वंस्त्रियांजह्यात्यस्तेनह्य

प्रिया नः प्राणान् अजयात् तस्यामपि यं स्वत्वं जयात्।

जितो जितः॥१२॥ यद्दर्थयुक्तिमिदं चाप्येरजितोपीश्वरस्तेनजितएव। नन्वकथमेवं तस्यां
स्वत्वाभिमानो दाक्षिण्यादेः। तदविचारेणेत्याह॥७॥ कृमिविड्भस्म निष्ठांतं क्वेदं तुच्छं कले
वरं। क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः॥१३॥ कृमिविड्भस्मसु निष्ठापर्यवसानम
ते यस्य तत् तदीयादेहार्थोऽरतिर्यस्यां या स्वमहिम्ना नभोपि च्छादयतीति तथा। किंचायि
चैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः। शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात्
॥१४॥ सिद्धैर्दैवलब्धैः। यज्ञावशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः। महतां निवृत्तानां ए भटी १५२
तद्धि वृत्त एवेत्याह॥७॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं। स्ववृत्त्यागतवित्तेन यजे

त पुरुषं पृथक्॥१५॥ देवादीन् पंचयज्ञदेवताः। आत्मानं चा एवं पृथगंतर्यामिणमेव य
जेत्॥७॥ यर्ह्यात्मनोधिकाराः स्युः सर्वाः स्युर्यज्ञसंपदः। वैतानिकेन विधिना अग्निहो
त्रादिना यजेत॥१६॥ ननु नरति निर्बंधो यज्ञार्थं कार्य इत्याह। नहीति॥७॥ न ह्यग्निमुखतो
यं वै भगवान्सर्वयज्ञभुक्। इज्येत हविषा राजन्यथा विप्रमुखे हुतैः॥१७॥ विप्रमुखेष्व
वैस्त्रादिभिर्यथा इज्येत पूज्येत न तथाग्निमुखतो हविषा इज्येत॥७॥ तस्माद्ब्राह्मण
देवेषु मर्त्यादिषु यथार्हतः। तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु॥१८॥ ब्राह्मणेष्व
पि देवेषु पंचयज्ञेयदेवतासु च। मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु। क्षेत्रज्ञमंतर्यामिणं यजस्व।

ब्राह्मणेभ्यश्च। देवेभ्यश्च पंचयज्ञे ब्राह्मणानां तु मन्वादियजने ब्राह्मणयजमानानां तु
संक्रान्त्यादिषु यजस्व। पापं तत्र ब्राह्मणस्थानेनं तं यस्य तां॥ कुर्याद्दापरपक्षीयं मासिप्रो
ष्ठपदे द्विजः। श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् ॥१९॥ प्रौष्ठपदे। भाद्रपदे। ब्राह्म
यने विष्णुवे कुर्याद्व्यतीपाते दिनक्षये। चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥२०॥ ती
यायां शुक्ल शुक्ले नवम्यामथ कार्तिके। चतस्रष्वष्टकासु हेमंते शिशिरे तथा ॥२१॥ शु
क्ले मासि शुक्लपक्षे। अक्षयतृतीयायामित्यर्थः। हेमंते शिशिरे च मार्गशीर्षादिमासचतु
ष्टयेपि याश्चतस्रोऽष्टकास्तासु ॥ माघे च सितसप्तम्यां मघाराकासमागमे रोकया।

त्रानुमत्योर्वा मासर्क्षाणि युतान्यपि ॥२२॥ संपूर्णचंद्रा पूर्णमासी राका अनुमतिश्चंद्रा सैकाङ्ग
मतिः। तथा मासर्क्षाणि तत्तन्मासनामप्रापकाणि नक्षत्राणि युतानि यदा स्यु
स्तदा। यदुक्तं त्रिकांड्यां। पुष्ययुक्ता तु पौर्णमासी पौषी मासे तु यत्र सा। नाम्ना स पौषो
माघाद्याश्चैवमेकादशापरे इति ॥ द्वादश्यामनुराधास्यात् श्रवणस्तिस्र उत्तराः। तिष्ठ
ष्येकादशी वा युजन्मर्क्षं श्रोणयोगयुक् ॥२३॥ अनुराधा श्रवण उत्तराफाल्गुनी उत्तराषा
ढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात्। आसु उत्तरासु एकादशी वा यदा स्यात्तदा
वा जन्मर्क्षं श्रोणयोगयुक् जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा। योगग्रह

णां संबंधबाहुल्यार्थो। न केवलं श्राद्धस्यैवैते कालाः। किंतु धर्ममात्रस्येत्याह। एतइति द्वा।
भ्यां॥७॥ एते ते श्रेयसः कालान्नृ. । श्रेयो विवर्धनाः। कुर्यात्सर्वात्मनैतेषु श्रेयो ऽमोघं तदा
युषः॥२४॥ तदेवायुषः अमोघं सफल्यमित्यर्थः॥७॥ एषु स्नानं जपो होमो व्रतं देवद्विजार्च
नं। पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं॥२५॥ संस्कारकाले जायाया अपत्यस्यात्मनस्त
था। प्रेतसंस्था मृताहश्च कर्मण्युभ्युदये नृप॥२६॥ संस्काराः काल इति जायायाः पुंसवना
दिः। अपत्यस्य जातकर्मादिः। आत्मनो यज्ञदीक्षादिः। प्रेतस्य संस्था दहनादिः। मृताहश्च सां भटी. १५३
वत्सरिकं। यद्वा। अन्यस्मिन्नभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषंगः॥७॥ अथ देशान्प्र

प्या २

वक्ष्यामि धर्मादिश्रेय आवहान्। स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते॥२७॥ बिंबं भग
८५ वतो यत्र सर्वमेतच्चराचरं। यत्र ब्राह्मणकुलं तपोविद्यान्वितं॥२८॥ यत्र यस्मिन्। सर्वमेतच्चरा
चरमस्ति तस्य भगवतो बिंबं रूपं यत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः॥७॥ यत्र यत्र ह
रेरर्चा स देशः श्रेयसां पदं। यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः॥२९॥ सरांसि पुष्क
रादीनि क्षेत्राण्यर्हाश्रितानि वा। कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः॥३०॥ अर्हैरुत्त
मैराश्रितानि॥७॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली। वाराणसी मधुपुरी पं
पा बिंदुसरस्तथा॥३१॥ नारायणाश्रमो नंदा सीतारामाश्रमादयः। सर्वे कुलाचला राज।

न्मदेहं दृमलयादयः॥३२॥ सीतायारामस्य वन्याश्रमाख्या दिर्येषां॥ द्वयोः प्रथमश्रद्धणं वियो
गकाला सिन्नायेण॥टी॥ एतेषुएषुतमादेशा द्वेरचा श्रिताश्चये॥ एता देशा निषेवेत श्रे
यस्कामो ह्यमीदृशाः॥ धर्मोह्यत्रेहितः भूमां सहस्रादिफलोदयः॥३३॥ स्वर्गाश्रिताश्च॥
शि॰ स्थिरवृत्तिमाश्रिताः पूर्वंकृशालिग्राम लिंलार्वनदेश उक्त इत्यपीनरुक्त्यं॥ अत्र एषु देशे
षु ईहितः कृतः॥ सहस्रगुणमधिकस्य फलोदयो यस्मात् तथा॥टी॥ पात्रं वत्र निरुक्तं वे
क विशिः पात्रविन्मेः हरिरेवैक उर्वीज्ञायत्मयैवे चराचरं॥३४॥ हरिरेव पात्रं निरुक्तं निर्ण भ॰टी॰ १५५
ता तदेवाह॥टी॥ देवर्षयस्तु वै यस्तु तत्र ब्रह्मात्मजादिषु॥ राजन्यदयन्नुज्ञायां मतः पात्र

तयाच्युतः॥३५॥ देवेषु चक्रषिषु तन्मध्ये ह्यवतपोयोगादिसिद्धेषु॥ ब्राह्मणात्मजादिषु मन
कादिष्वपिमस्तु तत्र वदीये राजसूये॥ यद्यस्मादच्युतएव पात्रतया संमतः॥ सम्मतं वेदेषु म
ह्ना॥टी॥ जीवराशिभिराकीर्णमण्डकोशांघ्रिपो महान्॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्म
तर्पणं॥३६॥ जीवराशिभिर्व्याप्तो ब्रह्माण्डकोश एव यो ऽ घ्रिपः॥ सर्वजीवानामात्मनश्च तर्प
णं॥ एतदेवपुरुषनामनिरुक्त्या दृढयति॥ पुराणीति॥टी॥ पुराण्येतेन सृष्टानि नृतिर्यगृ
षिदेवताः॥ शेते जीवेन रूपेण पुरेषु पुरुषोह्यसौ॥३७॥ नृतिर्यगादिरूपाणि पुराणि श
रीराणि तेषु अंतर्यामिरूपेण प्रत्यगंशेनचयतः शेते अतः पुरुष इति सिद्धः॥टी॥ तेष्वेवम

गवान्जीवतारतम्येन वर्त्तते। तस्मात्पात्रमिद्रूपेण त्रिह्रि पुरुषो यात्मो नो यथेयते॥३८॥ता
रतम्येन तिर्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्त्तते। तस्मात्पुरुषः पात्रं। तत्रापि यावा
नात्मा ज्ञानांशः। यथा यथा तपआदियोगेन यत्र यत्र व्रतीयते तथा तथा सोपात्रमित्यर्थः
।ननु तर्हि प्रतिमादौ हरेः पूजां किमिति कुर्वंति। तत्राह॥ठ॥ दृष्ट्वा तेषां मिथो नृणामवज्ञा
नात्मतां नृपत्रेतादिषु हरेरर्च्चा क्रियायै कविभिः कृता॥३९॥ मिथोऽवज्ञानमसन्मानात्
स्मिन्नन्यात्मा पुरुषे येषां तेषां भावं दृष्ट्वा क्रियायै पूजाद्यर्थं कविभिर्विद्वद्भिः॥ठ॥ ततोऽर्च्चायां
हरिं केचित्संश्रद्धाय सपर्यया। उपासंत उपास्तापि नार्थदा पुरुषद्विषां॥४०॥हरिमुपासंते

भ.टी.
१५५

उपासिताऽपि पुरुषद्वेषिणामर्थदा न भवति। पुरुषेषु द्वेषं हित्वार्चिता सती साऽपि मंदाधि
कारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः। पुरुषेष्वेव ज्ञानतपआदिभिश्च। पुनर्विशेषमा
माह॥ठ॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः। तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं॥
४१॥ यो वेदं धत्ते तं सुपात्रं विदुः। एतदेव कैमुत्यन्यायेन द्रढयति॥ठ॥ नन्वस्य ब्राह्मणा रा
जन्कृष्णस्य जगदात्मनः। पुनंतः पादरजसा त्रिलोकीं दैवतं महत्॥४२॥ स श्रीकृष्णस्य ब्रा
ह्मणाः। अनुगच्छतीत्यर्थः॥ठ॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे सदाचार
निरूपणे चतुर्दशोऽध्यायः॥ ॥ठ॥ ॥ततः पंचदशो सर्ववर्णाश्रमनिबंधनं। भारतः संग्र

द्दणाथवसर्व्यते मोक्षलक्षणं॥ सर्वेषामपि मोक्षसाधनकथनार्थमध्यायारंभः। तत्रश्राद्धग
तान्विशेषानाह॥ श्रीनारद उ०॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे॥ स्वाध्या
येन्ये प्रवचने येके वितज्ञानयोगयोः॥१॥ स्वाध्यायादिषु परिनिष्ठितेष्विति शेषः॥ ज्ञान
भा. निष्ठाय देयानि कव्यान्यानंत्यमिच्छता। दैवे च तदभावे स्यादितरेभ्यो यथार्हतः॥२॥ क
व्यानि पितृनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि। यथार्हतः इति सर्वज्ञानादि मटी·
तारतम्येन॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत्सुसमृद्धो पि श्राद्धे कु १५६
र्यान्न विस्तरं॥३॥ ननु विस्तरः कुतः प्राप्तः यन निषिध्यते। तत्राह॥ देशकालोचितश्र

द्धाद्रव्यपात्रार्हणानि च। सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात्॥४॥ स्वजनार्पण
त् जामाता चेन्निमंत्र्यते तत्पित्रादयः कथं वर्ज्या इत्येवं श्राद्धे विस्तरादित्यर्थः॥ देशका
ले च प्राप्ते मुन्यन्नं हरिदैवतं। श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं॥५॥ मुन्यन्नं आरण्य
व्रीह्यादि। हरिदैवतं हरये निवेदितं सत्॥ विप्रे निवेदितान्नेन यष्टव्यं देवतांतरमिति वच
नात्। पितृभ्यश्चैव तद्देयं॥६॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च। अन्नं संविभजन्प
श्येत्सर्वं तत्पुरुषात्मकं॥ पुरुषात्मकं ईश्वररूपं॥७॥ न दद्यादामिषं श्राद्धे न चाद्याद्ध
र्मतत्ववित्। मुन्यन्नैः स्यात्परा प्रीतिः यथा न पशुहिंसया॥८॥ नैतादृशः परो धर्मो नृणां सद्ध

र्मभिरुक्तोन्यासोदंडस्यभूतेषुमनोवाक्कायजस्य ॥८॥ दंडस्य न्यासः हिंसायां त्यागो यः प
तादृशो अन्यो धर्मो नास्ति। अतएवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह
॥ठ॥ एके कर्ममयान् यज्ञान् ज्ञानिनो यज्ञवित्तमाः। आत्मसंयमनेनीहा जुह्वति ज्ञानदी
पिते ॥९॥ एके अनीहाः निःकामाः ज्ञानदीपिते आत्मसंयमाग्निमिति आत्मसंयमने जु
ह्वति। मनो नियम्य तदंतराय तया त्यजंतीत्यर्थः ॥ठ॥ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूत — सटी. १५३
निबिभ्यति। एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं ॥१०॥ मामेष ध्रुवं हन्यादि
ति। कुतः। अकरुणः। नकुतः असुतृप् प्राणतर्पकः। नकिं। अतज्ज्ञः। आत्मतत्वा

नभिज्ञः। तथा च श्रुतिः। नतं विदाथ्य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रा
वृता जल्प्या चासुतृप उक्थशासश्चरंतीति। प्रस्तुतमनुवर्तयति। तस्मादिति ॥ठ॥ तस्माद्दै
वोपपन्नेन मुन्यन्नेनापि धर्मवित्। संतुष्टोऽहरहः कुर्यात् नित्यानैमित्तिकाः क्रियाः ॥११॥ विध
र्मः परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥१२॥ अधर्मव
त्साक्षान्निषिद्धवत्। क्रमममता हत्पंचापि व्याचष्टे ॥ठ॥ धर्मबाधो विधर्मः स्यात् परध
र्मोऽन्यचोदितः। उपधर्मस्तु पाषंडो दंभो वा शब्दभिच्छलः ॥१३॥ धर्मबाधः मद्बुद्ध्यापि य
स्मिन् क्रियमाणे स्वधर्मबाधः। अन्यस्य उदितो अन्यस्य परधर्मः। उपमेति व्याचष्टे। उ

पधर्मस्त्विति। शास्त्रस्यनित्त्वेदः अन्यथाव्याख्यानंयस्मिन्। यथादशावरान्नोजेयेत्युक्तेदश
म्यः अवरानिति। शास्त्रउदितिपाठेधर्मशास्त्रेमात्रंविप्रलब्धीतितथा। यथागांदद्यादित्युक्ते
मरिष्यंत्यागोःदानं॥ब॥ यस्त्विच्छयानृतंतुभिः आत्मात्मोद्यापमात्मपृथक्। स्वभाववि
हितोधर्मःकस्यनेष्टःप्रशांतये॥१४ स्वधर्मानुष्टानानंतरंधर्मत्तूयस्त्वार्थमपिपरधर्मोन
नानुष्टेयः। अनुपयोगादित्याह। स्वभावविहितइति॥ब॥ धर्मार्थमपितेहेतयात्रार्थंवा म.टी.
धनोधनं। अनीहाः नीहमानस्यमहादेरिवहृत्तिदा॥१५ अधनोधर्मार्थंधनेनेहेत। नापे १५८
क्षितइत्येतत्प्रपंचयति। अनीहेतिसार्धैःषड्भिः॥ब॥ संतुष्टस्यनिरीहस्यस्वात्मारामस्य

यत्सुखं। कुतस्तत्कामलोभेनधावतोर्थेहयादिशः॥१६ संतुष्टामनसःसर्वाःसदाशिवम
यादिशः। शर्कराकंटकादिभ्योयथोपानत्पदंशिवं॥१७ उपानद्गूढपादयोर्यस्य। तस्य।
॥ब॥ संतुष्टःकेनवाराजन्नवर्तेतापिवारिणा। उपस्थजिह्वकापण्यात्गृहपालायतेज
नः॥१८ गृहपालःश्वातद्वदाचरति॥ब॥ असंतुष्टस्यविप्रस्यतेजोविद्यातपोयशः। श्रवंति
इंद्रियलौल्येन। ज्ञानंचैवावकीर्यते॥१९ कामस्यांतंतुक्षुतृड्भ्यांक्रोधस्यैतत्फलोदयात्
जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः॥२० क्षुधयातृषयावजनःकामस्यांतंय
ति। क्रोधस्ययत्फलंहिंसातस्योदयान्निष्पत्तेः। दिशोजित्वापिभुक्त्वालोभस्यने

वातं यातीत्यर्थः॥ ॥ पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः। सदसस्पतयोप्येके असंय
मात्पतंत्यधः॥२१॥ इदानीं कामादिजयोपायानाह॥ असंकल्पादिति चतुर्भिः॥ ॥ असंकल्पा
ज्जयेत्कामं क्रोधं कामविवर्जनात्। अर्थानर्थेक्षया लोभं। भयं तत्वाभिमर्शनात्॥२२॥ अर्थेष्व
नर्थदर्शनेन तत्वावमर्शनात् आत्मानुसंधानेन॥ ॥ कृपया भूतजं दुःखं दैवं जह्यात्समाधि
ना। आत्मजं योगवीर्येण। निद्रां सत्वनिषेवया॥३॥ अन्यो भूतेभ्यो यज्जायते। तेष्वेव कृपया हि सटी· १५९
ताचरणेन दैवं तद्देवोपसर्गनिमित्तं तथा मनःपीडादि तज्जं याज्ञवल्क्येन। विमना विफला
रं जन्तः संमीदत्पतिमिमन्तः। आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन सत्वनिषेवया।

सात्विकाहारादिना निद्रां जयेत्॥ ॥ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया। यो
गांतरायान्मौनेन हिंसां कायाद्यनीहया॥२४॥ आन्वीक्षिक्या आत्मानात्मविवेकेन। म
हतां सात्विकानां सेवया। योगस्य अंतरायान् लोकवार्तादीन्। मौनेन॥ ॥ रजस्तम
श्च सत्वेन सत्वं चोपशमेन च। एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत्॥२५॥ ननु कथं
गुरुभक्त्या सर्वस्य जयः स्यात् तस्यापि मनुष्यत्वेन तदवस्थत्वात्। तत्राह यस्येति॥ ॥ य
स्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत्॥२६॥ म
र्त्यासद्धीः मनुष्य इति बुद्धिः। तस्य सर्वशास्त्रश्रवणं कुंजरस्नानवत् व्यर्थं न तु गुरोरपि उ स्ता

त्रकलत्रादयः तेन नरमवमन्यते इत्याह॥८॥ एषवैभगवान्साक्षात्प्रधानपुरुषेश्वरः।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोकोऽयंमन्यतेनरं॥२७०॥ एषसाक्षाद्भगवान्श्रीकृष्णः प्रधानपुरुषे
श्वरः प्रकृतिपुरुषयोर्नियंता। परमज्ञो लोकः एवं नरं मन्यते। तथा एष आत्मतत्वोपदेष्टा
गुरुः साक्षाद्भगवानेव नवेद। लोकस्य नवेद। माविविक्तिचांतिरित्यर्थः। एवं सर्वैरुपायैः का
मादिवेगं जित्वा यतेंद्रियो युक्त्वा ध्यानपरो भवेत्। अन्यथा तत्प्रतिपर्वशाखा वैकल्यं स्यादित्या
ह॥७॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः तदंता यदि नो योगानावहेयुः श्रमावहाः॥२
सर्वाश्चापि नियमचोदनाः इष्टापूर्त्तादयः षड्विंद्रियवर्गस्य संयमः तस्मिन्नेवैकस्मिन्नं

सटी.
२८०

तो यासां। तदेकपरा इत्यर्थः। न च तावतापि चरितार्था इत्याह। तदंताः संतो यदि योग
न्ध्यानधारणासमाधीन्न साधयेयुः। तर्हि केवलं श्रमावहा एवेत्यर्थः। एतदेव दृष्टांतेनाह॥
यथेति॥७॥ यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति। अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथा
ऽसतः॥२९॥ यथा वार्त्ता कृष्यादयः। अर्थाः तत्फला नित्ययोगस्यार्थं मोक्षं न साधयंति। अ
स्तु अनर्थाय संसारायैव भवंति। तथाऽसतो बहिर्मुखस्य इष्टापूर्तादयः। एवं योगं युंज
तोऽपि यस्य कुटुंबादिसंगेन चित्तं विक्षिप्येत तस्यैतत्कल्पमाह॥८॥ यश्चित्तविजये यत्तः स्यान्निः
संगोऽपरिग्रहः। एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः॥३०॥ यश्चित्तविजये यत्तः उत्तम

ःसभिक्षुःस्यात्।संन्यसेत।तथाचस्मृतिः।ध्वंवाद्गतस्यगार्हस्थ्येध्यानयोगादिकारणं।लब्ध
यिवाऽऽह्वास्पष्टंसंन्यसेद्विचारयन्निति।भिक्षायांयाथार्थंमितमशनंयस्य॥॥देहोऽश्वचौस
मेराजन्संस्थाप्यात्मनमात्मनः॥स्थिरंसुखंयमंतस्मिन्नासीनर्ज्वंगमोमिनि।३१कुंत्समसं
स्य।सुखंयथासवत्येवमासीत।ऊर्ध्वमिस्यचारयन्नितिशेषः॥॥घ्राणापानौसंनिरुध्यात्घ्र
रुकुंभकरेचकैःयावत्मनसऽन्नामात्रस्वनाभाग्रनिरीक्षणः।३२यतोयतोनिस्सरतिम मटी·
तःकामस्क्तंत्रमनस्ततस्ततउपाकृत्यहृदिरुध्यात्लैर्बुधः।३३एवमभ्यसतश्चित्तंकालेना १६१
त्मीयमायतेः।अत्रनिशांतस्यनिर्वाणंयात्यनिंधनवह्निवत्।३४एवमभिशामभ्यसतस्त्र

यतेश्चित्तंनिर्वाणंशांतिंयाति।नचेत्तुनविक्षिप्यतेस्यात्।कोकामादिभिरिति॥॥काम
दिभिरन्नाविद्धंप्रशांताखिलवृत्तियत्।चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित्।३५
कामादिभिस्तुभितंयच्चित्तं।नत्रोत्तिष्ठेतायतःप्रशांताखिलवृत्तयोयस्य।कृतः।ब्रह्म
सुखेनस्पृष्टं।यस्तुप्रव्रज्यांकृत्वापिनोगंलिप्सुःतंनिंदति।यइति॥॥यःप्रव्रज्यगृहात्पू
र्वंत्रिवर्गावपनात्पुनः।यदिसेवेततान्भिक्षुःसवैवांताश्यपत्रपः।३६त्र्याणांधर्मादीनां
वर्गःसमंतादुप्यतेयस्मिन्तस्मात्।गृहात्।तान्धर्मादीन्वांताशीछिन्नोजीवि
र्ह्लक्तश्च।नचेदमघटितंदृष्टवादित्याह॥॥यैःस्वदेहःस्मृतोनात्मामर्त्योविट्क्रमिभस्म ःस

सात्। त एतमात्मपात्स्वत्वाश्लाघयंति ह्यसन्नमाः॥३७॥ येः पूर्वैस्त्वदेहः अनात्मादिरूपः
स्मृतश्चिंतितः त एव पुनर्देहं नात्मेति मत्वा श्लाघयंति श्लाघयंति पुपलक्षणी त्वं अन्यान
पि सुधर्मत्यागिनो निंदंति घास्यं॥छ॥ टद्रष्टुं क्रियात्यागो व्रतत्यागो वटोरपि। तपस्वि
नो ग्राममेवाभिज्ञोरिंद्रियलौल्यता।३८। आश्रमापमदाद्येतत्खल्वाश्रमविडंबकाः। देवमा
या विमूढानां घ्रानुपेक्षेतानुकंपया।३९। आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः। कि
मिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः॥४०॥ तत्त्वात्मतत्त्वस्याभिज्ञः इंद्रियलौल्यमेव न सं
भवति। तथा च श्रुतिः। आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्क सटी. १६२

छि२ टी२

स्य कामाय शरीरमनुसंचरेदिति॥ अज्ञस्य तु लौल्येन नरकपातापत्तेः अवमन्येत सदा तं
ज्ञानेयति तव्यमिती ममर्थः आत्मानं रक्षितं विविधशरीरं रथमेव चेत्यादिश्रुत्युक्तरथरूप
कधारेणाह। आज्ञः रितिष्ठितः॥छ॥ आज्ञः शरीरस्थमिंद्रियाणि हयानभीशुं त्वमन इंद्रि
येशं। वर्त्मानि मात्राधिषणं च सूतं सत्त्वं बृहद्बंधुरमीशसृष्टं॥४१॥ इंद्रियेशं मनः अभी
शुं रश्मी ताज्ञः। मात्राः शब्दादीन् वर्त्मानि गंतव्यदेशान् आज्ञः। सत्त्वं चित्तं बृहत् देहव्यापि
बंधुरं बंधनं। चित्तं विना ह्यनिबद्धमिव शरीरं भवति। ईशसृष्टमिति बंधनकर्तावीश
एवेत्यर्थः॥छ॥ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं स जीवं। धनुर्हि तस्य

प्रणवं पठंति शास्त्रं तु बीजं परमेव लक्ष्म॥४२॥ प्राणादयः पंच। नागः कूर्मश्च कृकरो देवदत्तो
धनंजयः। इत्येवं दशप्राणाः स्मृताः। अभिमानं यादृक्कारं जीवं शारं। परं ब्रह्म स लक्ष्यं। यथ ध
नुषा शरेण लक्ष्ये निपात्यते। तथा प्रणवेन जीवो ब्रह्मणि एकीक्रियते॥ठ॥ रागो द्वेषश्च। ×५३
लोभश्च शोकमोदौ भयं मदः। मानो ऽवमानो ऽसूया च माया हिंसा च मत्सरः॥४३॥ रागा
दयो जेतव्याः शात्रवः॥ठ॥ रजः प्रमादस्तु निद्रालस्यश्च वस्त्ववमादयः। रजस्तमप्रकृतय सटी॰
सत्वप्रकृतयः क्वचित्॥४॥ तत्र रजो ऽपि निवेशाः। क्वचित् आरूढसमाधेः सत्वप्रकृतयो १६२
ऽपि परोपकारादिप्रवृत्तयः शात्रवः॥ठ॥ यावन्न कायस्थमात्मवशोपकल्प्यं। धत्ते गरिष्ठच

रणार्चनया निशातं। ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यमुच्चउपशांतदृढं विभ्र
ह्यात्॥४॥ यावन्न कायस्थं परस्थमात्मवदुपकल्प्यमिंद्रियादि परिकरोऽयमिति। तथानूतं।
यावद्धत्ते। तावद्देवगरिष्ठानां चरणसेवया निशातं ज्ञानखड्गं बिभ्रत्स्वच्युताश्रयः
सन् निरस्तशत्रुः उपशांतः स्वांतं देवदुष्टो ऽनूबाह्यं रथादिकमुपेक्षते त्यर्थः। अच्युता
श्रयो ऽपावे बाधकमात्॥ठ॥ नो चेत्स्यमन्नमसदिंद्रियवाजिभूतानीत्योल्पथं विषयदस्यु
भुवि क्षिपंति ते दस्यवः सद्यस्तमसुं तमोंधसंसारकूप उत्कच्छस्तु नये क्षिपंति॥४॥ दस्त्र
संतो बहिर्दुरवायेइंद्रियावाजिनः स्वतश्च ते उत्पथं प्रवहंति मार्गनीत्वा विषयास्येषुद

स्तु शुद्धिरित्यपि पंक्ति। द्वयोः स्मृतेन वसद्वर्त्मानं तमोधैतमप्राप्याप्ने ऊर्ध्वस्तुस्मयं यस्मिन्। ननु च
वेदविहितेष्टापूर्तादिकारिणः संसारः कथमेवमनर्थप्राप्तिः स्यात्। इत्याशंक्य वेदोक्तकर्म
णां द्वैविध्यं दर्शयन् फलमाह। प्रवृत्तं चेति द्वाभ्यां।७। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदि
कं। आवर्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं।४७। हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांति
दं। दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः।४८। हिंस्रं श्येनादिकर्म अशांतिदं। आदि
शब्दार्थविवरणं। दर्शश्चेति पशुः पशुयागः। सुतः सोमयागः।७। एतदिष्टं प्रवृत्ताख्यं। स.टी.
हुतं प्रहुतमेव च। पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं।४९। हुतं वैश्वदेवं प्रहुतं ब। १६४

लिहरणं। एतत्सर्वमिष्टमुच्यते। एतदेव यदि काम्यं। तर्हि अशांतिदं प्रवृत्ताख्यमपीत्यर्थः। आ
जीव्यं प्रपादि प्रवृत्तेन तकर्मणा आरोहावरोहाभ्यामावृत्तिं प्रवृत्तिप्रकारमाह।७। द्रव्यसू
क्ष्मविपाकश्च धूमो रात्रिरपक्षयः। अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः।५०। द्रव्यस्य
चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहांतरारंभकः। येन संपरिषक्तो गच्छ।
ति। धूमादिशब्दैस्तत्तदभिमानिनो देवाः। तत्र अपक्षयः कृष्णपक्षः। सोमः सोमलोकः। त
त्र भुक्तभोगस्य अवरोहप्रकारो दर्शयति दर्श इति। विपरीतलक्षणया विशिष्टेन
गम्यत्वचशोकाग्निना देहस्थलयेनादर्शनमुच्यते। एतदुक्तं भवति। भूतसूक्ष्मयुक्तो धूमाद्या

तिवाहकदेवताभिःसोमलोकंप्रापितस्तत्रभोगावसानेविलीनदेहोवृष्टिद्वारेणपृथिवी
रूधान्यादिमाध्यमिकक्रमेणजायते।एवंपुनर्नवदेहः॥बा॥चन्द्रेरेतइतिस्नेहशोपित्र्यानंपुन
र्नवः॥एकैकस्मिन्नादौपूर्वदेहत्यागात्पूर्वेदज्जायते।प॰पितृयानंप्रवृत्तिकर्ममार्गइतिस्नेहशोदे
हूपते।पुनर्नवमेवाह।एकैकस्मिन्प्रत्येकंक्रमेणबहुधातस्मांतिथ्यंप्राप्यइहत्नूमोजा
यते।तत्राधिकारिणमाह॥बा॥निषेकादिस्मशानांतैःसंस्कारैःसंस्कृतोद्विजःसन्मार्ग
रमतेयद्विविशिष्टंजन्मलभ्यते।प॰एवंचेद्विशिष्टाद्विकायेजन्मलभतइत्यर्थः॥निवृत्त मटी. १६५
कर्मनिष्ठस्यउपासनाविशेषमुपदिशन्नर्चिरादिमार्गेणब्रह्मलोकप्राप्तिमाह।इंद्रिये

भ्यइत्यादिना॥बा॥इंद्रियेभ्यःक्रियायज्ञान्ज्ञानदीपेजुह्वति।इंद्रियाणिमनसिसूर्मौवाविवेक
रिकंमनः।प॰द्रव्ययज्ञेषुइंद्रियव्यापाराणांश्रोत्रादीनांइंद्रियतावत्मात्रतांप्रापयती
त्यर्थः।एवमुत्तरत्रापि।ऊर्मौदर्शनादि।संकल्परूपेमनसिविकारिकंविकारयुक्तंमनो
वाचि।विध्यादिलक्षणयावाचाद्विमनःकष्टवाद्विविकारंभजति॥बा॥वाचंवर्णसमाम्नायेत्र
मोंकारेस्वरेन्यसेत्।ॐकारंबिंदौनादेतं।तंप्राणेमहत्यसुं।प॰वर्णानांसमाम्नायेसमुदाये
समुदायेतद्विशेषावाचःस्वरेस्वरत्रयात्मकेप्रणवेॐकारंबिंदौतंचनादेप्राणेसूत्रात्म
निअसुंसूत्रात्मानंमहतिब्रह्मणिप्रजनतो॥बा॥अग्निःसूर्योदिवाप्राह्णःशुक्लोराकोत्त

रः स्वराट् विश्वश्चतैजसः प्राज्ञः तुर्य आत्मा यमव्ययात्॥ ५४ अग्निरिति तत्तद्दशिमानिन्यो दे
वताः तःप्राप्नोतीति पूर्ववत्॥ दिवा अहः प्राह्णः तस्यैवांतः राकाशुक्लपक्षस्योत्तःस्वराट् ब्रह्म
एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह॥ विश्वइति। विश्वः स्थूलोपाधिस्तत्स्थू
लं स्वस्मे प्रविलाप्य सूक्ष्मोपाधिस्तैजसो भवति। सूक्ष्मं च कारणे विलाप्य कारणोपाधिः प्रा
ज्ञो भवति। कारणं च सर्वसाक्षित्वेनावयात्। प्राज्ञः स्वस्वरूपे प्रविलाप्य तुर्यो भवति। तेषां च व्या
पि यारिणां लये शुद्ध आत्मा भवति। मुक्तइति॥ यथे तेरावृत्त्वा निवर्तंते तथा न निवर्तंत इत्य भ.टी. १६६
र्थः॥ ५५॥ देवयानमिदं प्राहुः स्वाद्वापि तु पूर्वशः॥ आत्मयाजुपशांतात्माद्या त्यक्तोतेनिवर्तते।

॥ ५५ यएते पितृदेवानामयने वेदनिर्मिते॥ शास्त्रेण चक्षुषा वेदजनस्थोपि न मुह्यति॥ ५६ वेदे
न निर्मिते। ते धूममभि संभवंतीति श्रुतिः। तेऽर्चिरभिसंभवंतीत्यादिना वतिश्चयोः न विवि
च्य ज्ञापिते इत्यर्थः॥ जनस्थो देहस्थोपि न मुह्यति तत्र हेतुमाह॥ ५६॥ आदौ तेजतां मध्ये
२ ऽदृतं घरावरं त्तानं ज्ञेयं वचोवाच्यं। तमो ज्योतिस्त्वयं स्वयं॥ ५७ जनानां देहादीनां दौका
रणत्वेन। यस्स तथा बहिर्गतं अंतर्गतोऽस्ति परमवस्तु च अवतीर्य तमः अप्रकाशः ज्योतिः
प्रकाशः तत्तु सर्वं स्वयं ज्ञानी स्वयमेवानत्वस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति। येन तु हे दित्य
र्थः॥ ननु तर्हि कथं पृथगर्थत्वस्यापि प्रतीयते। तत्राह॥ ५७॥ आबाधितोपि ह्याभासो य

थावस्तुतयास्मृतः। तद्वदैंद्रियकं सर्वमर्थत्वेन विकल्पितं। प॰ अबाधितत्वविरोधेन सर्वत
तोबाधितोपिस्वप्नाभासः इति बिंबादिर्वस्तुतयास्मृतः। तद्वदैंद्रियकं सर्वमनर्थत्वेन विका।
ल्पितं। नतुपरमार्थतः। कुर्वीट यात्। तदेवाह॥८॥ क्षित्यादीनामिहार्थानां छायानकतमा
पि हि। नसंघातो विकारो पि न पृथक् नान्वितो पि ह॥ प॰ क्षित्यादीनां पंचभूतानां छायाप्र
कल्पत्तु ध्यालंबनरूपं देहादिसंघातारंभपरिणमानां मध्ये कतमापि स्वल्पतमापि न भव
ति। नतावत्तेषां संघातः। वृक्षाणामिव वनं एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः। नह्येक
स्मिन् वृक्षे आकृष्टे सर्वं वनमाकृष्यते। नच विकारः क्षीरस्येव दध्यवयवी अपि नारब्धान्नपरिण सटी॰ १६३

मते। कुतः। प॰ किं स्वावयवेभ्यो वा परिणमते। तेभ्यो वा पृथक्। तदन्वितो वा। न तावदन्यं तं।
पृथक्। तथा प्रतीतेः। न चान्वितः। प॰ किं प्रत्यवयवं सर्वोप्यस्ति। अंशेन वा। आद्ये अंगु
लिमात्रे पि देहबुद्धिः स्यात्। द्वितीये तस्याप्यंशांगीकारे सति अनवस्था स्यात्। अतो पृ
थेवेत्यर्थः। एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमेवाह॥९॥ धा
तवो वयविद्वाच्च तन्मात्रावयवैर्विना। न स्युर्ह्यसत्यवयविन्यसन्नवयवो तनः। प॰ धारयं
तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः। अवयविद्वात्तेषामपि तद्व
यवः सत्यः। इति चेत्तत्राह। उक्तप्रकारेणावयविन्यसति। अवयवोप्यंते नो असन्नेव।

स्यात्।अन्वयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः।तदुक्तं पंचमस्
कंधे।एवं निरुक्तं क्षितिशब्दवृत्तमित्यादि।नन्वन्वयविनोऽभावे आगमापायिभिर्बाल्या
दिभिर्यो यं देवदत्त इति प्रत्यभिज्ञानं स्यात्।तदुक्तं षष्ठे:।आविर्भावतिरोभावधर्मकेष्वन
पायि यत्।तदस्मीति तत्राह।ठ।आभासादृश्यपत्रमसत्त्वावत् विकल्पे सति वस्तुनः।जाग्रत्स्वा
पौ यथा स्वप्ने तथा विधिनिषेधता।६२।वस्तुनः परमात्मनो विकल्पे भेदे अन्यसति।यद्वा वस्तुनो।
अविद्यया विकल्पे सति पूर्वपूर्वारोपमाहरणात्।स एवेति भ्रमः स्यात्।सत्त्वं तावदेवं यावद्विधि
निवृत्तिः।ननु सर्वं मिथ्यात्वे शास्त्रस्य विधिनिषेधता कथं।तत्राह।स्वप्नमध्ये जाग्रत्स्वापवत्।

स्वाप्यथेति।इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति।भावाद्वैतमितिद्वा
भ्याम्।ठ।भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः।वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धु
नुते मुनिः।६२।वर्तयन्नालोचयन्स्वानुभूत्या आत्मतत्त्वानुभवेन त्रीन्जाग्रदादीन्त्रयःअ
वस्थाः।त्रयः स्वप्ना इति श्रुतेः।यद्वा वस्तुबुद्धिरेकः स्वप्नः तत्साधनं अधिकारिभेदेन कर्मभे
दबुद्धिर्द्वितीयः स्वप्नः।ततो मत्कर्मसाधितमेतत्फलं मामेव भोग्यमिति तृतीयः स्वप्नः।तान्धुनो
तिः धुनुते निवर्तयति।ठ।कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्।अवस्तुत्वाद्विकल्पस्य भावा
द्वैतं तदुच्यते।६३।कार्यकारणयोर्वस्त्वैक्यस्य मर्शनं आलोचनं।तंतुरेव न पट इति।ठ।यद्ब्र

ह्मणि परे साक्षात्सर्वकर्मसमर्पणं मनोवाक्तनुभिः पार्थक्रियाद्वैतं तदुच्यते। ६४ मनोवाक्
तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा। उद्देश्यफलभेदो हि क्रियाभेदहेतुः।
ईश्वरार्पणेन च तदभावात्क्रियाणामद्वैतं ॥६४॥ आत्मजायासुतादीनामन्येषां सर्वदेहि
नां। यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते। ६५ आत्मनः स्वस्य जायादीनां स्वार्थः कामत
योः देहादीनां पंचभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्यदैक्यदर्श
नमित्यर्थः। उक्तानामाश्रमधर्मान्संक्षिप्याह यदिति ॥६५॥ यद्यस्य वानिषिद्धं स्याद्येन यत्र
यतो नृप। स तेनेहेत कार्याणि नरो नान्यैरनापदि। ६६ यत् द्रव्यं येनोपायेन यतः सकाशा

भा.टी. १६९

चक्रन्दर्शीन् तथा श्रीकृष्णादेवतारकात्संसारादप्युत्तरतेत्यर्थः। श्रीकृष्णसेवामह
तामवज्ञया त्र्यस्यति। तद्रूपयावर्षिघ्नतीति दर्शयन्स्वपूर्ववृत्तान्तमाह। अहमिति सार्धैः प
चभिः ॥६८॥ अहं पुराभवं कश्चिद्गंधर्व उपबर्हणः। नाम्नातीते महाकल्पे गंधर्वाणां सुसंमतः
।६९ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः। स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरलंपटः। ७०
पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥७०॥ एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः। उप
हूता विश्वसृग्भिर्हरिगाथोपगायने। ७१ अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः। ज्ञा
त्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा। ७२ तदाकर्णनं विधानदृष्टमपि उन्मत्तः सन्स्त्रीभिः

भा.टी. १७०

त्वा प्रस्तुतमुपसंहरति। एवं ते इति॥११॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः। गृहेष्वपि
गतिं या यातरां ज्ञानक्रियाग्रः ॥१२॥ अयमेवश्री ब्रह्म प्रगतिं तत्क्रियाक्रमस्य प्रकृः।
एतच्च सर्वसाधारणमुक्तं। तत्रक्रमस्तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पांडवानेव लक्ष्मी साधन
लक्ष्माह। यथा हीति॥१३॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभो। य
त्पादपंकेरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतून्॥१४॥ देहं नृपदेव नृपैर्दैवैश्च सम। श्री
द्वायैर्देशाजादितिवा स्वात्मनः श्रीकृष्णादेवभगोर्दितोः। स्वंडपावन्नार्थः। उक्त वर्णा। १३०
तरतेत्यर्थः। यथा यथावत्। तमेव भजतेति शेषः। यद्वा यथा स्वापद्गणादुत्तीर्णस्त्वं यथा

रिष्टतो गतः ज्ञात्वा विश्वगुरुं जगन्नाथं। हन्तनां शत्रु रोजसा॥१२॥ रिष्टतः गायन्नेव गतः। तदा रो
मुत्तापंदकः॥१०॥ यादिवंशवृतामापूतश्रीः हतद्वेलनः। तावद्यास्यामहं जज्ञे तत्रा
पि ब्रह्मवादिनं॥१३॥ शुश्रूषयानुषंगेण प्राप्तोहं ब्रह्मपुत्रतां॥१३॥ धर्मस्तेगृहमेधीयो वर्णि
तः पापनाशनः। गृहस्थो येन पदवीमंजसा न्यासिनामियात्॥१४॥ श्रीशुक उवाच॥ इति देव
र्षिणा प्रोक्तं निशम्य भरतर्षभ। पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः॥१५॥ कृष्णपा
र्थावुपामंत्र्य पूजितः प्रययौ मुनिः। श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः॥१६॥ इति
दाक्षायिणीनां ते पृथग्वंशाः प्रकीर्तिताः। देवासुरमनुष्याद्या लोका यत्र चराचराः।

॥१७॥ ॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेअष्टादशसाहस्र्यांसंहितायांयुधिष्ठि
रनारदसंवादेपंचदशोध्यायः॥ ॥छ॥ ॥समाप्तःसप्तमस्कंधः॥ ॥छ॥ ॥शिवमस्तु॥
सर्वजगतांपरहितनिरताभवंतुभूतगणाः॥दोषाःप्रयांतुनाशंसर्वत्रजनःसुखीभवतु
॥ ॥छ॥ ॥संवत् १६९८ वर्षेफाल्गुनवदि २ बुधेलिखितमिति॥ ॥छ॥ ॥छ॥ ॥छ॥
श्रीउमावरजयजय॥ ॥छ॥ ॥ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥